# Bharatasamskritih Samskritabharati

# ભારતસંસ્કૃતિઃ સંસ્કૃતભારતી

## Document Information

Text title : bhAratasaMskRRitiHsaMskRRitabhAratI

File name : bhAratasaMskRRitiHsaMskRRitabhAratI.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : gu. gaNapayyahoLLaH

Transliterated by : Shubha shubhazero at gmail.com

Proofread by : Shubha shubhazero at gmail.com

Acknowledge-Permission: Samskrita Bharati <a href="http://www.samskritabharati.org/">http://www.sams

Latest update : September 22, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose. Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

**Please help to maintain respect for volunteer spirit.**

October 2, 2019

*sanskritdocuments.org*

# ભારતસંસ્કૃતિઃ સંસ્કૃતભારતી

ભારતસંસ્કૃતિઃ સંસ્કૃતભારતી દ્વયમેતન્મમ જીવનમ્ ॥

યત્ર મુનીનાં શમકલિતાનાં મઙ્ગલ-મન્ત્રનિનાદઃ ।
યત્ર કવીનાં મૃદુભણિતીનાં મઞ્જુલકાવ્ય-વિનોદઃ ॥

યસ્યાઃ કીર્તિપતાકા સતતં પ્રચરતિ વિશ્વમશેષમ્ ।
યસ્યાઃ સંસ્તવલેશત એવ વિન્દતિ ચિત્તમકલુષમ્ ॥

યસ્યાઃ પ્રવહતિ વેદોપનિષદ્-ગીતાજલમતિરુચિરમ્ ।
યસ્યાઃ પ્રભવતિ ભાષાસન્તતિરમિતાકારા સુચિરમ્ ॥

યસ્યૈ જીવનસમયો નીતઃ શઙ્કરમધ્વમુનીનામ્ ।
યસ્યૈ કવિતાકર્મ સમર્પિતમતુલં વ્યાસમુખાનામ્ ॥

યયા જનાનાં યોગરતાનાં વિકસિતમાત્મજ્ઞાનમ્ ।
યયા કલાનાં નાટ્યગતાનાં વિસ્તૃતમખિલવિધાનમ્ ॥

યાં પરિપાતું પરમતબાધાદ્ અનવરતં યતનીયમ્ ।
યામિહ નેતું સુલલિતમાર્ગે સઙ્ઘટનં કરણીયમ્ ॥

યા ગઙ્ગાજલ-પુણ્યતરઙ્ગૈર્વહતિ પવિત્રિતગાત્રમ્ ।
યા કુલભવને પરિજનવદને લસતિ ઘનાદરપાત્રમ્ ॥

- ગુ. ગણપય્યહોળ્ળઃ

Encoded and proofread by Shubha shubhazero at gmail.com

Please send corrections to *sanskrit@cheerful.com*